[1]पृष्टम्-पुष्टवान् इति रूपाण्यस्माद्भवन्तीति विशेषः।

(1077) "प्रेषृ गतौ" (I-भ्वादिः-619. सक. सेट्. आत्म.)

प्रेषकः-षिका, प्रेषकः-षिका, पिप्रेषिषकः-षिका, पेप्रेषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि।

(1078) "प्रैणृ गतिप्रेरणश्लेषणेषु" (I-भ्वादिः-458. सक. सेट्. पर.)

'पैणृ-' इति धातोः पाठभेदोऽयम्। सर्वाण्यपि रूपाणि भौवादिककेपृधातुवत् (261) ज्ञेयानि। [A]प्रैणनम्।

(1079) "प्रोथृ पर्याप्तौ" (I-भ्वादिः-867. सक. सेट्. उभ.)

'प्रोथति=सूदति' इति 'प्रोथदश्वो न यवसे—' (तैत्ति. सं. 4.4.3.3) इति मन्त्रव्याख्यायां व्याख्यानात्, 'अपप्रोथ दुन्दुभे दुच्छुनाम्—' (तैत्तिरीयसंहिता 4.6.6.7) इत्यत्र, 'अपप्रोथ=मारय—' इति व्याख्यानाच्च भट्टभास्करमते हिंसार्थकोऽयं धातुः इति मा. धा. वृत्तिदर्शनाज्ज्ञायते। "—पर्याप्तिगतौ' इत्यपि कचिदर्थनिर्देशः कृतः। 'अपप्रोथनम्=हुङ्करणम्।' इति क्षुरे।" इत्यपि मा. धा. वृत्तिः। 'शब्दार्थोऽपि। अपपूर्वस्तु मारणे हुङ्करणे वा' इति धा. का. व्याख्याने (2.25)। भाष्यप्रदीपोद्योतात् (1-4-56) नायं धातुरिति ज्ञायते।

प्रोथकः-थिका, प्रोथकः-थिका, पुप्रोथिषकः-पुप्रुथिषकः-षिका, पोप्रुथकः-थिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। [2]प्रोथः=अश्वादीनां नासारज्जुः।

(1080) "प्लिह गतौ" (I-भ्वादिः-642. सक. सेट्. आत्म.)

प्लेहकः-हिका, प्लेहकः-हिका, पिप्लिहिषकः-पिप्लेहिषकः-षिका, पेप्लिहकः-हिका; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्लिश्यतिवत् (287) ज्ञेयानि। [3]प्लीहा।

---

1. निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति इण्निषेधः।
2. 'हलश्च' (3-3-121) इति संज्ञायां करणे घञ्।
3. 'श्वन्नुक्षन्—' [द. उ. 6.55.] इत्यादिना कनिन्प्रत्ययान्तो निपातितः। प्लीहा=कुक्षिव्याधिः, अध्वगश्च।

A. 'प्रश्चोणितान् प्रैणनविघ्नणद्क्षितीन् अनुल्बणान् धेनुगणान् कनत्स्तनान्॥' धा.का.1.59.